
# पाठ-११
# अनुच्छेद लेखनम्

**सारान्शः**
अस्माभिः वर्णपदवाक्यानां प्रयोगेण एव विचाराणाम् अभिव्यक्तिं कुर्मः।अनुच्छेदे सर्वाणि वाक्यानि परस्परं सम्बद्धानि भवन्ति ।

- अनुच्छेदे वाक्यानि भवन्ति ।
- वाक्येषु क्रियापदं कर्तानुसारं भवति । क्रियापदं विना वाक्यं पूर्णं न भवति।
- वाक्यानि परस्परं सम्बद्धानि सन्ति ।
- वाक्यानाम् आधारबिन्दुः एक एव,तद् एव शीर्षकम् ।
- अनुच्छेदस्य समाप्तौ काचित् सूक्तिः, सुभाषितं वा योज्यते।
- अनुच्छेदे सम्बद्धाता, क्रमबद्धता, तारतम्यता अपि भवेत्।

**अनुच्छेदस्य उपाङ्गानि**




**रूपरेखाम्** अधिकृत्य अनुच्छेदलेखनम्
अनुच्छेदलेखनात् पूर्वं विषयमधिकृत्य रूपरेखानिर्माणम् अत्यधिकम् आवश्यकम्।

**चित्राधारितम्** अनुच्छेदलेखनम्
चित्रम् आधारीकृत्य अपि अनुच्छेदलेखनं भवति।

**सौन्दर्यविधायकानि तत्त्वानि** अनुच्छेदलेखनम्
वाक्ये पदानां शुद्धता, उपयुक्तपदानां चयनं, तेषां सम्यक्संयोजनं च अनुच्छेदस्य सौन्दर्यविधायकानि तत्त्वानि ।

**मुख्य बिन्दवः**
**1**.वाक्येषु तारतम्यता स्थापनीया ।
**2.**अनुच्छेदे कुत्रचिदपि वर्तनीगता अशुद्धिः न भवेत ।
**3**.सर्वत्र क्रियापदं कर्तृपदानुसारम् एव भवेत ।
**4**.विशेषणपदानां लिङ्गवचनविभक्त्यादयः विशेष्यानुसारमेव भवेत ।
**5.**वाक्यानि परस्परसम्बद्धानि भवेयुः ।
**6.**उपयुक्तानां मधुराणां पदानां प्रयोगः एव द्रष्टव्यम् ।
**7.**अन्ते एका सम्बद्धा सूक्तिः अपि भवेत।

**अवगच्छामः**
**वाक्ये अशुद्धिपरिहाराय एते नियमाः सावधानेन पालनीयाः।**
भाषायाः शुद्धतायाः तात्पर्यं यत् भाषा व्याकरणसम्मता भवेत्। वाक्ये कारकक्रिया लिङ्गवचनादीनां समुचितः अन्वयः अनिवार्यः । वाक्ये क्रियापदं कर्तृपदानुसारम् एव भवति । यथा- मौनव्रतम् अस्ति । अहं करोमि।
अत्र एतदपि स्मर्तव्यं यत् कर्मवाच्ये क्रिया कर्मपदानुसारं भवति । यथा-मया गीता पठ्यते।
भाववाच्ये च क्रिया एकवचने एव भवति । यथा- बालकैः सुप्यते ।
विशेषणस्य लिङ्गं वचनं विभक्तिश्च विशेष्यानुसारम् एव भवन्ति । यथा- खेलते बालकाय । गच्छत् यानम्....।

**आवश्यकोऽयं ज्ञानम्**
अनुच्छेदलेखने पदचयने अपि उपयुक्तानाम् एव पदानां चयनं करणीयम्। संस्कृतं सर्वाधिकं समृद्धम्। अत्र एकस्य अर्थस्य द्योतकाः बहवः शब्दाः वर्तन्ते । परन्तु प्रत्येकं शब्दे काचित् विशेषता विद्यते। यदि कश्चित् कथयति- "पात्रे सलिलम् अस्ति ।" अत्र 'सलिलम्' इति पदस्य प्रयोगः अनुपयुक्तः यतः पात्रे स्थितं जलं 'सलिलं' न भवति। सलिलं (लीलया सहितम्) तु नदीनां निर्झराणाम् एव जलं भवति ।
अनुच्छेदलेखने प्रयत्नः विधेयः यत् शुद्धानाम् उपयुक्तानां च शब्दानाम् एव प्रयोगः क्रियते । यथा- 'शुष्कः वृक्षः तिष्ठति अग्रे" इत्यस्य स्थाने 'नीरसः तरुः पुरतः भाति' अधिकं रोचते ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्य ।।
विशेषणस्य लिङ्गं वचनं विभक्तिः च विशेष्यानुसारं भवति।

**'सुप्तिङन्तं पदम्'**
**सुबन्त**-प्रातिपदिकैः सह सुप् विभक्तीनां योगेन सुबन्तपदानां निर्माणं भवति।

**तिङ्न्त**-धातुभिः सहः तिङ् प्रत्ययानां योगेन तिङन्तपदानि जायन्ते ।

**योग्यतां वर्धयत**

भाषा एव मानवजीवनस्य वैशिष्ट्यम्। पशूनामपि भाषा भवति परन्तु तत् तु केवलं सांकेतिकरूपेण विद्यते । वयं मानवाः चिन्तयितुं किंचिद् नवीनं विचारयितुं कल्पयितुं च शक्नुमः । अस्माकं विचाराणाम् अभिव्यक्तिः द्विधा भवति भाषणेन लेखनेन वा। लेखने अपि अनेके विधयः भवन्ति - गद्यमयं, पद्यमयं नाट्यमयं च । 'गद्यं कवीनां निकषं वदन्ति' इति कथनानुसारं गद्यलेखनं सुकरं न भवति । गद्यरचनायां कथानिबन्धानुच्छेदादयः अनेकाः विधाः सन्ति । अनुच्छेदे वयं शीर्षकविषयकम् एकं बिन्दुम् एव आधारीकृत्य संक्षेपेण विचाराणाम् अभिव्यक्तिं कुर्मः । एवम् अनुच्छेदे कस्यापि एकस्य विचारस्य चिन्तनस्य भावादेश्च संक्षेपेण प्रवाहयुक्तं वर्णनं भवति ।

**पाठ संप्रेष्यः**

- वर्णानां योगेन प्रातिपदिकानि भवन्ति ।
- प्रातिपादिकैः पदनिर्माणं क्रियते
- पदानि मिलित्वा वाक्यं रचयन्ति ।
- परस्परसम्बद्धानि वाक्यानि एव मिलित्वा अनुच्छेदं रचयन्ति ।
- अनुच्छेदे केन्द्रीभूतः विचारः भवेत् ।
- वाक्येषु तारतम्यता भवेत् ।
- अनुच्छेदस्य अन्ते काचित् सूक्तिः भवेत् ।
- अनुच्छेदस्य मुख्यबिन्दुम् अधिकृत्य शीर्षकं लिख्यते ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अनुच्छेदानां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- अनुच्छेदस्य लेखन अभ्यासं कुरुत।